# Shri Sundari Aparadhakshamapana Stotram

# શ્રીસુન્દર્યાઃ અપરાધક્ષમાપણસ્તોત્રમ્

## Document Information

Text title : Sundari Aparadhakshamapana Stotram

File name : sundaryaparAdhakShamApaNastotram.itx

Category : devii, stotra, devI

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan Iyer

Proofread by : Sivakumar Thyagarajan Iyer, Rajani Arjun Shankar

Description-comments : Rudrayamala

Latest update : Augst 14, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીસુન્દર્યાઃ અપરાધક્ષમાપણસ્તોત્રમ્

ૐ ન જાનામિ ધ્યાનં તવ ચરણયોઃ પ્રીતિજનનં
　　ન જાનામિ ન્યાસં મનનમપિ માતર્ન ગિરિજે ।
તદેતત્ ક્ષન્તવ્યં ન ખલુ પશુરોષઃ સમુચિતઃ
　　કુપુત્રો જાયેત ક્વચિદપિ કુમાતા ન ભવતિ ॥ ૧॥

ન જાને ભક્તિં ત્વત્પદ-કમલયોઃ કામપિ શિવે
　　ન ચ ક્રોધાદીનાં શમનમપિ ષણ્ણાં ક્વચિદપિ ।
તદેતત્ ક્ષન્તવ્યં ન ખલુ પશુરોષઃ સમુચિતઃ
　　કુપુત્રો જાયેત ક્વચિદપિ કુમાતા ન ભવતિ ॥ ૨॥

ન કૌલાચારસ્ય સ્મરણમપિ માતર્ન ગિરિજે
　　ન મન્ત્રાણાં જાપ્યં શવશયનભૂમૌ તવ નિશિ ।
કુપુત્રાણામેષા પરિહરતુ ચેષ્ટામનિમિષં
　　કુપુત્રો જાયેત ક્વચિદપિ કુમાતા ન ભવતિ ॥ ૩॥

ન તીર્થેષુ સ્નાનં તવ ચરણયોઃ પ્રીતિજનનં
　　ન મન્ત્રાણાં જ્ઞાનં નિજ-ગુરુમુખાચ્છૈલ-તનયે ।
તદેતત્ ક્ષન્તવ્યં તદિદમપરાધ-દ્વયમપિ
　　કુપુત્રો જાયેત ક્વચિદપિ કુમાતા ન ભવતિ ॥ ૪॥

ન ચ પ્રાણાયામં જનનિ ન ચ મુદ્રાવિરચનં
　　સપર્યા-પર્યાલોચનમપિ ન જાને ત્રિનયને ।
વિપજ્જાલે ઘોરે પતિતમપિ મામુદ્ધર શિવે
　　કુપુત્રો જાયેત ક્વચિદપિ કુમાતા ન ભવતિ ॥ ૫॥

સહસ્રારે પદ્મે પરમશિવ-પર્યઙ્કનિલયા
　　કદાપિ ત્વં ધ્યાતા તુહિનગિરિ-કન્યે ન ચ મયા ।
શિવે મત્વા દાસં પરિહરતુ નિત્યં નિજગુણાત્
　　કુપુત્રો જાયેત ક્વચિદપિ કુમાતા ન ભવતિ ॥ ૬॥

વિધેરજ્ઞાનેન દ્રવિણ-વિરહેણાલસતયા
    વિધેયાન્ મેऽકૃત્વા જનનિ તવ પૂજા-ચ્યુતિરભૂત્ ।
તદેતત્ ક્ષન્તવ્યં ન ખલુ પશુરોષઃ સમુચિતઃ
    કુપુત્રો જાયેત ક્વચિદપિ કુમાતા ન ભવતિ ॥ ૭॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીસુન્દર્યાઃ અપરાધ-ક્ષમાપણ-સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, Rajani Arjun Shankar

*Shri Sundari Aparadhakshamapana Stotram*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*